# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (११)

२०.०९.२०११

# पुनरावर्तनम्

- नकारान्तः पुंलिङ्गः पथिन्-शब्दः ।
- सर्वनामस्थानेषु 'इतोऽत्सर्वनामस्थाने' इति इकारस्य अकारादेशः, 'थो न्थः' इति थकारस्य न्थादेशः ।
- सौ 'पथिमथ्यृभुक्षामात्' इति आकारः अन्तादेशः । पन्थाः ।
- अन्येषु सर्वनामस्थानेशु उपधादीर्घः । पन्थानौ, पन्थानः ।
- भसंज्ञायाम् 'भस्य टेर्लोपः' । पथः, पथा ।
- पदसंज्ञायां नलोपः । पथिभ्याम्, पथिभिः ।

- स्त्रियां नान्तलक्षणे ङीपि भत्वात् टिलोपः ।
- शोभनः पन्थाः यस्याः सा
- सुपथिन्  (ङीप्) ई ('ऋन्नेभ्यो ङीप्' - ४.१.५ - इति ङीप् प्रत्ययः)
- सुपथ्     ई   ('भस्य टेर्लोपः' - ७.१.८८)
- सुपथी सुमथी नगरी ।
- अनृभुक्षी सेना । (न विद्यते ऋभुक्षाः यस्याः सा)

- आत्त्वं नपुंसके न भवति, 'न लुमताङ्गस्य' इति प्रत्ययलक्षणनिषेधात् ।
- शोभनः पन्थाः यस्य तत् ।
- सुपथिन्  (सुँ) स्
- सुपथिन्       ('स्वमोर्नपुंसकात्' - ७.१.२३- इति सोः लुक्)
- सुपथि       ('नलोपः प्रातिपदिकान्तस्य' - ८.२.७ - इति नलोपः)
- सुपथि वनम् ।

# ‘सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः’ (वा)

- हे सुपथिन् / हे सुपथि ।
- नलोपे कृते ’सम्बुद्धौ च’ (७.३.१०६) इति इकारस्य गुणे प्राप्ते,
- ‘नलोपः सुप्-स्वर-संज्ञा-तुग्विधिषु कृति’ इति नलोपस्य असिद्धत्वाद् ह्रस्वस्य गुणो न ।

- द्विवचने भत्वात् टिलोपः ।
- सुपथिन्   औ
- सुपथिन्   (शी) ई (‘नपुंसकाच्च’ - ७.१.१९ - इति शी)
- सुपथ्   ई  (‘भस्य टेर्लोपः’ - ७.१.८८)
- सुपथी

- शौ सर्वनामस्थानत्वात् सुपन्थानि ।
- सुपथिन्  (जस्) अस्
- सुपथिन्   (शि)  इ   (‘जश्शसोः शिः’ - ७.१.२०)
- सुपथ् अ न्   इ   (‘इतोऽत्सर्वनामस्थाने’ - ७.१.८६ - इति अकारादेशः)
- सुपन्थ् अ न्  इ   (‘थो न्थः’ - ७.१.८७ - इति थस्य न्थादेशः)
- सुपन्थानि    (‘सर्वनामस्थाने चासम्बुद्धौ’ - ६.४.८ - इति उपधादीर्घः)

- सुपथा ।
- सुपथे, सुपथिभ्याम् इत्यादि ।

# नकारान्तः नपुंसकलिङ्गः सुपथिन्-शब्दः

शौ सर्वनामस्थानत्वात् अत्वम्, न्थादेशः, उपधादीर्घः

सोः लुक्, नलोपः । सोः लुका लुप्तत्वात् आकारादेशो न ।

| | …कवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | सुपथि | सुपथी | सुपन्थानि |
| …क्तिः | सुपथिन् / हे सुपथि | हे सुपथी | हे सुपन्थानि |
| द्वितीयाविभक्तिः | सुपथि | सुपथी | सुपन्थानि |
| | सुपथा | सुपथिभ्याम् | सुपथिभिः |
| | सुपथे | सुपथिभ्याम् | सुपथिभ्यः |
| | सुपथः | सुपथिभ्याम् | सुपथिभ्यः |
| | सुपथः | सुपथोः | सुपथाम् |
| सप्तमीविभक्तिः | सुपथि | सुपथोः | सुपथिषु |

भसंज्ञापक्षे ‘भस्य टेर्लोपः’ इति टिलोपः

भ्यामादिषु हलादिषु नलोपः

- नकारान्तः पुंलिङ्गः ‘पञ्चन्’ शब्दः ।
- नित्यं बहुवचनान्तः ।

- पञ्चन् (जस्) अस्

# ३६९. ष्णान्ता षट् (१.१.२४)

- पदद्वयम् । ष्णान्ताः, षट् ।
- 'बहुगणवतुडति संख्या' (१.१.२३) इत्यतः 'संख्या' इति अनुवर्तते ।
- षान्ता नान्ता च संख्या षट्संज्ञा स्यात् ।
- 'षड्भ्यो लुक्' (७.१.२२) ।
- षट्-संज्ञकेभ्यः परयोः जस्-शसोः लुक् स्यात् ।

- पञ्चन् अस् ('ष्णान्ता षट्' इति षट्संज्ञा)
- पञ्चन् ('षड्भ्यो लुक्' - ७.१.२२ - इति जसः लुक्)
- पञ्च ('नलोपः प्रातिपदिकान्तस्य' - ८.२.७)

- संख्या किम्?
- विप्रुषः, पामानः ।
- विप्रुष्-पामन् इत्येतयोः ष्णान्तत्वेऽपि संख्यावाचकत्वाभावात् जसः लुक् न

- शतानि, सहस्राणि इत्यत्र संनिपातपरिभाषया न लुक्, सर्वनामस्थानसंनिपातेन कृतस्य नुमः तदविघातकत्वात् ।

- शत  (जस्) अस्
- शत  इ  ('जश्शसोः शिः' - ७.१.२० - इति जसः शिः)
- शत न्  इ  ('नपुंसकस्य झलचः' - ७.१.७२ - इति नुमागमः)
- इदानीं नकारान्तत्वात्, शतशब्दस्य संख्यावाचकत्वात् षट्-संज्ञायां 'षड्भ्यो लुक्' इति जसः लुक् प्राप्नोति ।
- संनिपातपरिभाषाविरोधात् लुक् न भवति ।
- अङ्गस्य सर्वनामस्थानस्य च संनिपातम् आश्रित्य प्रवृत्तः नुमागमः षट्-त्वसम्पादनद्वारा सर्वनामस्थानस्य लुकं प्रति निमित्तं न भवति ।

- पञ्चभिः ।
- पञ्चभ्यः ।
- पञ्चभ्यः ।
- 'षट्चतुर्भ्यश्च' (७.१.५५) इति नुट् ।
- षट्-संज्ञकेभ्यः चतुरश्च परस्य आमः नुडागमः स्यात् ।

- पञ्चन्  आम्
- पञ्चन् न् आम्  ('षट्चतुर्भ्यश्च' -७.१.५५- इति नुट् )

# ३७०. नोपधायाः (६.४.७)

- पदद्वयम् । न, उपधायाः ।
- 'अङ्गस्य' (६.४.१) इति अधिक्रियते । 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (६.३.१११) इत्यतः 'दीर्घः' इति, 'नामि' (६.४.३) इति अनुवर्तते ।
- न-इति लुप्तषष्ठीकम् अङ्गस्य इत्यधिकृतस्य विशेषणम् ।
- नान्तस्य उपधायाः दीर्घः स्यात् नामि परे ।

- पञ्चान् नाम् ('नोपधायाः' - ६.४.७ - इति उपधादीर्घः)
- पञ्चा नाम् ('नलोपः प्रातिपदिकान्तस्य' - ८.२.७)

- पञ्चसु

# नकारान्तः पुंलिङ्गः पञ्चन्-शब्दः

जश्शसोः लुक्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमाविभक्तिः | | | पञ्च |
| द्वितीयाविभक्तिः | | | पञ्च |
| तृतीयाविभक्तिः | | | पञ्चभिः |
| चतुर्थीविभक्तिः | | | पञ्चभ्यः |
| पञ्चमीविभक्तिः | | | पञ्चभ्यः |
| षष्ठीविभक्तिः | | | पञ्चानाम् |
| सप्तमीविभक्तिः | | | पञ्चसु |

भिसादिषु हलादिषु नलोपः

आमः नुडागमः, नामि उपधादीर्घः, नलोपः

- परमपञ्च । परमपञ्चानाम् ।
- परमाश्च ते पञ्च च इति कर्मधारये पञ्चन् इत्यस्य प्राधान्यात् लुक्, नुट् च भवतः ।
- गौणत्वे तु न लुङ्नुटौ ।
- प्रियपञ्चा, प्रियपञ्चानौ, प्रियपञ्चानः ।
- प्रियाः पञ्च यस्य सः इति बहुव्रीहिः । राजन्-शब्दवद्रूपाणि ।
- प्रियपञ्च्ञाम् ।
- अल्लोपे कृते नकारस्य श्चुत्वेन ञकारः । द्वयोः ञयोः मध्ये चकारः फलति ।

- एवं सप्तन्, नवन्, दशन् ।